**Sri Sathya Sai Books and Publications Trust,**
**Prasanthi Nilayam.**

# श्री रुद्रम्

## 3rd Anuvaka

नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो

namaḥ sahamānāya nivyādhina āvyādhinīnāṁ pataye namo

नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो

namaḥ kakubhāya niṣaṅgiṇe stenānāṁ pataye namo

नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो

namo niṣaṅgiṇa iṣudhimate taskarāṇāṁ pataye namo

नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो

namo vañcate parivañcate stāyūnāṁ pataye namo

नमो निचेरवे परिचरायारण्यानां पतये नमो

namo nicerave paricarāyāraṇyānāṁ pataye namo

नमः सृकाविभ्यो जिघाग्ंसद्भ्यो मुष्णतां पतये नमो

namaḥ sṛkāvibhyoo jighāgṁsadbhyo muṣṇatāṁ pataye namo

नमोऽसिमद्भ्यो नक्तंचरद्भ्यः प्रकृन्तानां पतये नमो

namo'simadbhyo naktaṁcaradbhyaḥ prakṛntānāṁ pataye namo

नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो

nama uṣṇīṣiṇe giricarāya kuluñcānāṁ pataye namo

नम इषुमद्भ्यो धन्वाविभ्यश्च वो नमो

nama iṣumadbhyoo dhanvāvibhyaśca vo namo

नम आतन्वानेभ्यः प्रतिद्धानेभ्यश्च वो नमो

nama ātanvānebhyaḥ pratidadhānebhyaśca vo namo

नम आयच्छद्भ्यो विसृजद्भ्यश्च वो  नमो

nama  āyacchadbhyo visṛjadbhyaśca vo  namo

नमोऽस्यद्भ्यो विध्यद्भ्यश्च वो  नमो

namo'syadbhyo vidhyadbhyaśca vo  namo

नम आसीनेभ्यः शयानेभ्यश्च वो  नमो

nama āsīnebhyaḥ śayānebhyaśca vo  namo

नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो

namaḥ svapadbhyo jāgradbhyaśca vo namo

नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो

namastiṣṭhadbhyo  dhāvadbhyaśca vo namo

नमः सभाभ्यः सभापतिभ्यश्च वो  नमो

namaḥ sabhābhyaḥ sabhāpatibhyaśca vo  namo

नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नमः

namo aśvebhyo'śvapatibhyaśca vo namaḥ